श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि प्रपत्तिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि प्रपत्तिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

श्रीचापपत्तनसदालयसुप्रतिष्ठौ
श्रीरुक्मिणीकरसरोरुहलालनीयौ।
श्रीवेदमौलिरमणीयमणीव मान्यौ
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 1 ॥

भामाकरग्रहणकण्टकितौ मनोज्ञौ
सद्यःप्रफुल्लसरसीरुहकान्तिचोरौ।
साम्राज्यचिह्नपरिकर्मितमूलभागौ
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 2 ॥

श्रीनन्दगेहकृतसङ्क्रमणौ जनन्याः
अग्रेकृताग्र्यनवनीतनवीननृत्तौ।
मञ्जीरशिञ्जितमनोहरतालतानौ
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 3 ॥

एतौ कथं नु मृदुलौ नवपल्लवाभौ
क्लृप्तातिघोरशकटासुरमर्दनौ ते।
इत्यादरेण जननीकरसम्प्रमृष्टौ
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 4 ॥

sundar kidāmbi
prapatti dot com

वेदावतंसमुनिमानसनन्दवास -
    सञ्चारचारुसुकुमारतरौ सुमृष्टौ।
गोपाङ्गनाभिरभिरामकराङ्गुलीभिः
    श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 5॥

वज्रध्वजाङ्कुशसरोरुहशङ्खचक्र -
    चिह्नैर्विचित्रितसदङ्गणगेहभागौ।
साश्चर्यभक्तिभरगोपसमीक्षितौ ते
    श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 6॥

कालीयमौलितलक्लृप्तविचित्रनृत्तौ
    चित्रं तदीयमणिसन्ततिरञ्जितौ ते।
अन्यानवाप्यनिजचिह्नतदुत्तमाङ्गौ
    श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 7॥

प्रातर्विलोक्य मुनयस्सवितुस्सुताया -
    श्चिह्नानि सैकतगतानि ययोः प्रहृष्टाः।
तामीरयन्ति भगवत्पदवाहिनीति
    तौ राजगोपचरणौ शरणं प्रपद्ये॥ 8॥

हा ! हन्त ! हन्त ! मृदुलौ मम तातपीडां
    सन्ताडनैरकुरुतामिति जाम्बवत्या।
अङ्के निधाय करपल्लवलालितौ ते
    श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 9॥

याभ्यां हि विष्णुपदभूषणकन्यकेयं
    नित्यं विभाति परिभूषितसैकतेति।
आश्लिष्य तां वहति विष्णुपदी नदी सा
    श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 10॥

**प्रपत्तिरेषा प्रकृतौ स्थितानां**
**कृतैरधैरप्रकृतिं गतानाम्।**
**महौषधं मानिधिना वितीर्णं**
**श्रीराजगोपालकृपाबलेन॥ 11 ॥**

॥ इति श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि प्रपत्तिः समाप्ता॥

sunder kidāmbi
prapatti dot com
sunder kidāmbi